# शिवनामावल्यष्टकं

हे चंद्रचूड मदनांतक शूलपाणे
स्थाणो गिरीश गिरिजेश महेश शंभो ।
भूतेश भीतभयसूदन मामनाथं
संसारदुःखगहनाज्जगदीश रक्ष ॥ 1

हे पार्वतीहृदयवल्लभ चंद्रमौले
भूताधिप प्रमथनाथ गिरीशचाप ।
हे वामदेव भव रुद्र पिनाकपाणे
संसारदुःखगहनाज्जगदीश रक्ष ॥ 2

हे नीलकंठ वृषभध्वज पंचवक्त्र
लोकेश शेषवलय प्रमथेश शर्व ।
हे धूर्जटे पशुपते गिरिजापते मां
संसारदुःखगहनाज्जगदीश रक्ष ॥ 3

हे विश्वनाथ शिव शंकर देवदेव
गंगाधर प्रमथनायक नंदिकेश ।
बाणेश्वरांधकरिपो हर लोकनाथ
संसारदुःखगहनाज्जगदीश रक्ष ॥ 4

वाराणसीपुरपते मणिकर्णिकेश
वीरेश दक्षमखकाल विभो गणेश ।

© 2022 Vedam Nadam

सर्वज्ञ सर्वहृदयैकनिवास नाथ
संसारदुःखगहनाज्जगदीश रक्ष ॥ 5

श्रीमन्महेश्वर कृपामय हे दयालो
हे व्योमकेश शितिकंठ गणाधिनाथ ।
भस्मांगराग नृकपालकलापमाल
संसारदुःखगहनाज्जगदीश रक्ष ॥ 6

कैलासशैलविनिवास वृषाकपे हे
मृत्युंजय त्रिनयन त्रिजगन्निवास ।
नारायणप्रिय मदापह शक्तिनाथ
संसारदुःखगहनाज्जगदीश रक्ष ॥ 7

विश्वेश विश्वभवनाशक विश्वरूप
विश्वात्मक त्रिभुवनैकगुणाधिवेश ।
हे विश्वनाथ करुणामय दीनबंधो
संसारदुःखगहनाज्जगदीश रक्ष ॥ 8

गौरीविलासभुवनाय महेश्वराय
पंचननाय शरणागतकल्पकाय ।
शर्वाय सर्वजगतामधिपाय तस्मै
दारिद्र्यदुःखदहनाय नमः शिवाय ॥ 9

॥ इति श्रीमच्छङ्कराचार्यविरचितं शिवनामावल्यष्टकं संपूर्णम् ॥

© 2022 Vedam Nadam